# अभ्यास-प्रश्नपत्रम् - 2020-21 (Set -3)

## कक्षा - दशमी

## संस्कृतम् (कोड-122)

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**'अ' - भागः (बहुविकल्पात्मकः) 40 अङ्काः**

**'आ' - भागः (वर्णनात्मकः) 40 अङ्काः**

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ' - भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ' - भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(v) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vi) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## 'अ'-भागः 40 अङ्काः

## (बहुविकल्पात्मकाः प्रश्नाः)

| | **अनुप्रयुक्त-व्याकरणम्** | |
|---|---|---|
| **1.** | **अधोलिखितेषु रेखांकितपदानां सन्धिपदं सन्धिच्छेदपदं वा चिनुत –** (केवलं प्रश्नचतुष्टयम्)<br>(i) कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?<br>(क) कथम् + एकैकशः (ख) कथमेक + ऐकशः (ग) कथम + ऐककशः<br>(ii) **दुर्वहमत्र** जीवितं जातम्।<br>(क) दुर + वहम् + अत्र (ख) दुर्व + अहम् + अत्र (ग) दुः + वहम् + अत्र<br>(iii) **कश्चन** निर्धनो जनः भूरि परिश्रम्य किञ्चित् वित्तम् उपार्जितवान्।<br>(क) कश्च् + अन (ख) कः + चन (ग) कश् + चन<br>(iv) एकदा **केनापि** आवश्यकार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।<br>(क) के + न + अपि (ख) केन् + आपि (ग) केन + अपि<br>(v) वनस्य दृश्यं समीपे एव + एका नदी वहति।<br>(क) एवैका (ख) एवेका (ग) एव एका | 1x4=4 |

| | | |
|---|---|---|
| **2.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** (केवलं प्रश्नचतुष्टयम्)<br>(i) सिंहः **वनस्य राजा** अस्ति।<br>(क) वनराजा (ख) वनराजः (ग) वनराजन्<br>(ii) महानगरमध्ये चलदनिशं **कालायसचक्रम्**।<br>(क) काला अयसचक्रम् (ख) कालायसः चक्रम् (ग) कालायसस्य चक्रम्<br>(iii) विनिपातो न वः कश्चिद् दृश्यते **त्रिदशाधिपः**।<br>(क) त्रिदशः अधीपः (ख) त्रयः दशाधिपः (ग) त्रयाणां दशानाम् अधिपः<br>(iv) यः इच्छति **आत्मनः श्रेयः** प्रभूतानि सुखानि च।<br>(क) आत्मश्रेयः (ख) आत्मनश्रेयः (ग) आत्मश्रयः<br>(v) **निशान्धकारे** प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।<br>(क) निशायाः अन्धकारे (ख) निशानाम् अन्धकारे (ग) निशा च अन्धकारः च तस्मिन् | 1x4=4 |
| **3.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत-** (केवलं प्रश्नचतुष्टयम्)<br>(i) कश्चन निर्धनो जनः भूरि **परिश्रम्य** किञ्चित् वित्तम् उपार्जितवान्।<br>(क) परि + श्रम् यक् (ख) धीर + मत (ग) धैर्य + क्तवतु<br>(ii) **अध्यापिका** पाठं पाठयति।<br>(ख) अध्यापक + डाप् (ग) अध्याप + इका (ग) अध्यापक + टाप्<br>(iii) सर्वेषामेव **महत्त्वं** विद्यते यथासमयम्।।<br>(क) मह + त्त्वं (ख) महत् + त्व (ग) महत् + त्वम्<br>(iv) माला **रमणीया**।<br>(क) रम + णीया (ख) रमणी + या (ग) रमणीय + टाप्<br>(v) यत्रास्ते सा **धुर्ता** तत्र गम्यताम्।<br>(क) धु + र्ता (ख) धुर्त + टाप् (ग) धुर्त + डाप् | 1x4=4 |
| **4.** | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) किम् **.........** विद्यालयम् गच्छन्ति।<br>(क) छात्रः (ख) छात्राः (ग) छात्रैः<br>(ii) आम्! छात्रैः विद्यालयः **..........**।<br>(क) गम्यन्ते (ख) गम्यतः (ग) गम्यते<br>(iii) त्वम् किं **............**?<br>(क) करोति (ख) करोषि (ग) करोसि<br>(iv) सम्प्रति **..........** श्लोकः रट्यते।<br>(क) अहम् (ख) अस्माभिः (ग) मया | 1x3=3 |

| | | |
|---|---|---|
| **5.** | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) अहम् प्रातः 5:30....... जागरणम् करोमि।<br>(क) पादोनपञ्चवादने (ख) सपादपञ्चवादने (ग) सार्धपञ्चवादने<br>(ii) रमेशः 7:45 ........ अल्पाहारं स्वीकरोति।<br>(क) सपाद-अष्टवादने (ख) पादोन-अष्टवादने (ग) पादोन-सप्तवादने<br>(iii) माता 9.15 ............ मन्दिरम् गच्छति।<br>(क) सार्ध- नववादने (ख) सपाद-नववादने (ग) पादोन-नववादने<br>(iv) छात्राः 9:15 ................ विद्यालयं गच्छति।<br>(क) पादोननववादने (ख) सार्धनववादने (ग) सपाद नववादने<br>(v) शिक्षकः 12:45 ........ गणितं पाठयति।<br>(क) पादोनद्वादशवादने (ख) पादोन-एकवादने (ग) सार्ध-एकवादने | 1x4=4 |
| **6.** | **वाक्यानुगुणम् उचितम् अव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) ....... अवकाशः भविष्यति।<br>(क) श्वः. (ख) ह्यः (ग) अद्य<br>(ii) त्वम् ........ पठिष्यति?<br>(क) कदा (ख) यदा (ग) ह्य:ओ<br>(iii) ......... त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।<br>(क) कदा (ख) यदि (ग) चेत्<br>(iv) करणीयं बहिरन्तर्जगति तु ............ शुद्धीकरणम्।<br>(क) कदा (ख) किञ्चित् (ग) बहु | 1x3=3 |
| **7.** | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धपदं विकल्पेभ्यः चिनुत-** (केवलं प्रश्नत्रयम्)<br>(i) अहम् क्रीडाक्षेत्रे **क्रीडति**।<br>(क) क्रीडसि (ख) क्रीडामः (ग) क्रीडामि<br>(ii) सिंहः **भयङ्कर** वने निवसति।<br>(क) भयङ्करे (ख) भयङ्करः (ग) भयङ्करम्<br>(iii) **सः** भोजनं कुरु।<br>(क) रामः (ख) अहम् (ग) त्वम्<br>(iv) ताः सुन्दर्यः **बालिका** नृत्यन्ति।<br>(क) बालकाः (ख) बालिक्यः (ग) बालिकाः | 1x3=3 |
| | **पठितावबोधनम्** | |
| **8.** | **रेखांकित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत-**(केवलं पञ्चप्रश्नाः)<br>(i) विद्यालये **अध्यापकाः** छात्रान् अध्यापयन्ति।<br>(क) के (ख) काः (ग) कौ<br>(ii) आरक्षी **चौरेभ्यः** त्रायते। | 1x5=5 |

| | | |
|---|---|---|
| | (क) कस्मात् (ख) केभ्यः (ग) कस्मेभ्यः<br>(iii) मानवैः **सदा** सत्यं वक्तव्यम्।<br>(क) यदा (ख) तदा (ग) कदा<br>(iv) श्रृगालेन सहितं **पुनरायान्तं** व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।<br>(क) कम् (ख) कीदृशम् (ग) कियन्तम्<br>(v) दुर्वहम् **अत्र** जीवितं जातं प्रकृतिरेव शरणम्।<br>(क) कत्र ( ख) कुत्र (ग) कस्मिन्<br>(vi) परम् **अर्थकार्श्येन** पीडितः सः बसयानं विहाय पदातिरेव प्राचलत्।<br>(क) कार्श्येन (ख) केन (ग) कया | |
| **9.** | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चिनुत-**<br>(केवलं प्रश्नचतुष्टयम्)<br>(i) **दुर्वहम्** अत्र जीवितं जातं प्रकृतिरव शरणम्।<br>(क) दुष्टम् (ख) दुःखम् (ग) कठिनम्<br>(ii) प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो माम् **अत्तुम्** कलहायमानौ चपेटया प्रहरन्ती दृष्टा।।<br>(क) मारयितुम् (ख) भक्षयितुम् (ग) आगन्तुम्<br>(iii) कृषकः तं वृषभं **तोदनेन** नुद्यमानः अवर्तत।<br>(क) दानेन (ख) कष्टप्रदानेन (ग) भयेन<br>(iv) गुह्यम् **आख्याति**।<br>(क) खादति (ख) भक्षयति (ग) वदति<br>(v) यः इच्छति आत्मनः श्रेयः **प्रभूतानि** सुखानि च।<br>(क) बहूनि (ख) धनानि (ग) दुःखानि | 1x4=4 |
| **10.** | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत-**<br>(केवलं प्रश्नषट्कम्)<br>(i) "त्यक्त्वा धर्मप्रदां वाचं परूषां योऽभ्युदीरयेत्<br>परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।"<br>अस्मिन् श्लोके किं क्रियापदं नास्ति?<br>(क) त्यक्त्वा (क) भुङ्क्ते (ख) अभ्युदीरयेत्<br>(ii) "निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा" अस्मिन् वाक्ये 'शुभावहा' इत्यस्य किं विशेषणपदम्?<br>(क) निशान्धकारे (ख) विजने (ग) पदयात्रा<br>(iii) "आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः" अस्मिन् वाक्ये 'रिपुः' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) ऋतुः (ख) शत्रुः (ग) रोगः<br>(iv) "श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती"<br>अस्मिन् वाक्ये विशेष्यपदं किम्? | 1x6=6 |

| | | |
|---|---|---|
| | (क) सहितं (ख) पुनरायान्तं (ग) व्याघ्रं<br>(v) "एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्" अस्मिन् वाक्ये किं कर्तृपदम्?<br>(क) भयात् (ख) बुद्धिमती (ग) मुक्ता<br>(vi) "एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्" अस्मिन् वाक्ये 'कान्तारे' इत्यस्य पदस्य कृते किं पर्यायपदं प्रयुक्तम्?<br>(क) तुल्यवत्सला (ख) जननी (ग) अपत्येषु<br>(vii) "वायुमण्डलं भृशं दूषितं न हि निर्मलम्" अस्मिन् वाक्ये किम् अव्ययपदम् नास्ति?<br>(क) भृशं (ख) न (ग) हि | |

**'आ' - भागः**

**वर्णनात्मकाः प्रश्नाः40 अङ्काः**

| | **अपठितावबोधनम्** | |
|---|---|---|
| **11** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**<br>सुभाषचन्द्रबोसः भारतस्य महान् स्वतन्त्रतासेनानी आसीत्। सः क्रान्तिकारी नेता वीरयोद्धा च आसीत्। सुभाषस्य जन्म बङ्गप्रान्ते 1897 तमे ख्रीष्टाब्दे जनवरीमासस्य 23 दिनाङ्के अभवत्। अस्य पितुः नाम जानकीनाथबोसः आसीत्। अयं बाल्यकालादेव बुद्धिमान्, धैर्यवान् साहसी च आसीत्। सः कोलकातानगरे तथा इंगलण्डदेशे शिक्षां प्राप्तवान्। सः महात्मागान्धिनः प्रेरणया भारस्य स्वतन्त्रतायै असहयोग-आन्दोलने कांग्रेसदलस्य सहयोगी अभवत्। किन्तु कांग्रेसदलस्य विचारेण असन्तुष्टो भूत्वा सः महान् संघटनकर्तारूपेण 'आजाद-हिन्द-फ़ौज' इति सेनां संघटितवान्। सः देशे हिन्दू-मुस्लिमयोः एकतायाः कृते 'फारवर्ड-ब्लाक' इत्यस्य स्थापनां कृतवान्। जर्मनीदेशे आकाशवाण्या भारतस्य स्वाधीनतायाः सन्देशं दत्तवान्। तस्य आह्वानम् आसीत् – "यूयं मह्यं रक्तं ददातु अहम् युष्मभ्यं स्वातन्त्र्यं दास्यामि।" आंग्लशासकैः सह युद्धक्रमे विमानदुर्घटया तस्य मृत्युः जातः इति श्रूयते। सुभाषः भारतमातुः वीरसुपुत्रः तथा देशभक्तानां कृते महान् प्रेरणास्रोतः आसीत्। | 10 |
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) कः भारतस्य महान् स्वतन्त्रतासेनानी आसीत्?<br>(ii) कः क्रान्तिकारी आसीत्?<br>(iii) सुभाषचन्द्रबोसस्य पितुः नाम किम् आसीत्? | 1x2=2 |
| | **आ. पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) सुभाषचन्द्रबोसस्य आह्वानम् किम् आसीत्?<br>(ii) सुभाषचन्द्रबोसः बाल्यकालात् कीदृशः आसीत्?<br>(iii) सुभाषचन्द्रबोसः किं संघटितवान्? | 2x2=4 |
| | **इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** | (1) |

| | | |
|---|---|---|
| | **ई. यथानिर्देशम् उत्तरत- (केवल प्रश्नत्रयम्)**<br>(i) '**यूयं मह्यं रक्तं ददातु अहम् युष्मभ्यं स्वातन्त्र्यं दास्यामि**' इत्यत्र कर्तृपदं किम्?<br>(क) यूयम् (ख) युष्मभ्यम् (ग) अहम्<br>(ii) '**आकाशवाण्या**' इत्यत्र का विभक्तिः वर्तते?<br>(क) द्वितीया (ख) तृतीया (ग) सप्तमी<br>(iii) '**संघर्षः**' इत्यस्य पदस्य कः पर्यायः अत्र आगतः?<br>(क) आन्दोलनम् (ख) युद्धः (ग) असहयोगः<br>(iv) अनुच्छेदे '**सहयोगी**' इत्यस्य कः विपर्ययः आगतः?<br>(क) दुष्टः (ख) शत्रुः (ग) विरोधी | 1x3=3 |
| | **रचनात्मक-कार्यम्** | |
| **12** | **भवान् चन्दनः। स्वकीयं जनकं प्रति रक्तदानशिविरविषयकं लिखितं पत्रं मंजूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत।**<br><br>छात्रावासः<br>हरिद्वारः।<br>दिनांकः 22.05.2021<br><br>पूज्य पितृमहोदय!<br>सादरं चरणवन्दना।<br><br>अत्र कुशलं तत्रास्तु। अद्याहं भवन्तं ............यद् अस्माकं विद्यालये ....................... रक्तदानशिविरम् आयोजितम्। अस्माकं कक्षाध्यापकः श्रीमान् ..............शिविरस्य प्रमुखः आयोजकः आसीत्। सः प्रथमं स्वकीयं .............. प्रायच्छत्। तदनन्तरम् दशमकक्षायाः ..................छात्राः एतस्मिन् शुभकार्ये अग्रेसराः अभवन्। तेषाम् ...................दृष्ट्वा मम मनसि रक्तदानस्य अपि .............. सञ्जाता। मित्रैः सह अहमपि .................... कृतवान्। आशासे यद् भवान् मम एतां भावनां ...................प्रसन्नो भविष्यति। अहं पूर्णतया सकुशलोऽस्मि दौर्बल्यं चापि न अनुभूयते। चिन्तया अलम्। मातुः चरणेषु प्रणमम् ............।<br><br>भवतः आज्ञाकारी पुत्रः,<br>विमलकुमारः | 1/2x10=5 |
| | **मञ्जूषा**<br>रक्तं, उत्साहं, गतसप्ताहे, निवेदयामि, रक्तदानम्, उमाशंकरमहोदयः, पञ्च, अर्पयामि, भावना, दृष्ट्वा | |

| | | |
|---|---|---|
| **13** | **प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–**<br><br>**मञ्जूषा-**<br>तडागः, भवनम्, मार्गः, वृक्षाः, आकाशः, नास्ति, नीलः, जलम्, पुष्पाणि, सन्ति, तृणानि, उत्पीठिका, रमणीयम्, सुन्दरम्, जनरहितम्, स्थानम्, मानुष्यः, भूमौ, पाषाणखण्डाः | 1x5=5 |
| | **अथवा**<br>मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –<br>**"दूरदर्शनम्"**<br>मञ्जूषा-<br>दृश्य-श्रव्यमाध्यमः, मनोरञ्जनसाधनम्, समाचरम्, प्रत्यक्षरूपेण, शिक्षणम्, कक्षा, गृहेषु, अल्पमूल्यम्, ग्रामेषु, सुलभम्, आविष्कारम्, पालनिपकः, जनाः, पश्यन्ति | 1x5=5 |
| **14** | **अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवल वाक्यपञ्चकम्)**<br>(i) मैं गेन्द से खेलता हूँ। I play with ball.<br>(ii) बच्चे घर आ गए। hildren ame to home.<br>(iii) तुम कहाँ जा रहे हो। Where are you going.<br>(iv) वे लोग खाना खायेंगे। They will eat meal.<br>(v) सदा सत्य बोलना चाहिए। Truth should be spoken only.<br>(vi) राम लंका गए। Ram went Lanka.<br>(vii) नर्तकी नाच रही है। The daner is daning. | 1x5=5 |
| | **पठितावबोधनम्** | |
| **15** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्टर्यात् पुत्रौ | 3 |

| | | |
|---|---|---|
| | चपेटया प्रहृत्य जगाद - "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः**?** अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) बुद्धिमती कुत्र व्याघ्रं ददर्श?<br>(ख) राजपुत्रस्य नाम किम् आसीत्?<br>(ग) बुद्धिमती कया प्रहृत्य जगाद?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) बुद्धिमती किमर्थं पितुगृहं प्रति चलिता?<br>(ख) व्याघ्रम् आगच्छन्तं दृष्ट्वा सा किं कृतवती?<br>(ग) बुद्धिमती किं जगाद? | 1/2x2=1<br><br><br><br><br>1x2=2 |
| **16** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।**<br>**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्॥**<br>**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्। शुचि... ॥3॥**<br>**अ. एकपदेन उत्तरत** (केवलं प्रश्नद्वयम्)<br>(क) किम् भृशं दूषितम् अस्ति?<br>(ख) धरातलं केन युक्तम् अस्ति?<br>(ग) भक्ष्यं कीदृशम् अस्ति?<br>**आ. पूर्णवाक्येन उत्तरत** (केवलं प्रश्नद्वयम्)<br>(क) कीदृशं जलं नास्ति?<br>(ख) अस्माभिः किं करणीयम् अस्ति?<br>(ग) 'अत्यधिकम्' इत्यस्य पयार्यपदं श्लोकात् चित्वा लिखत। | 3<br><br><br><br>1/2x2=1<br><br><br><br>1x2=2 |
| **17** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**काकः** - रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।<br>**गजः**- समीपतः एवागच्छन्। अरे! अरे! सर्वां वार्तां श्रृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः, बलशाली, पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि। वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।<br>**वानरः** - अरे! अरे! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति।)<br>**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः करुणापरः अस्ति?<br>(ख) कः विशालकायः अस्ति?<br>(ग) कस्य शुण्डः अस्ति?<br>**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**<br>(क) कः सिंहं शुण्डेन मारयिष्यति? | **3**<br><br><br><br><br><br><br><br>1/2x2=1<br><br><br><br>1x2=2 |

| | | |
|---|---|---|
| | (ख) कः गजस्य पुच्छं विधूय वृक्षोपरि आरोहति?<br>(ग) कः पिकस्य सन्ततिम् पालयति? | |
| **18** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -**<br>**वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।**<br>**स केनापि प्रकारेण परैर्न परिभूयते ॥6॥**<br>**अन्वयः** - (यः) मन्त्री (i)..........., धैर्यवान्, सभायाम् (ii).......... अपि, सः परैः (iii).......... अपि प्रकारेण न (iv).........।<br>**मञ्जूषा-**<br>वाक्पटुः, परिभूयते, अकातरः, केन<br>**अथवा**<br>**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**<br>**आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।**<br>**तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥8॥**<br>**भावार्थः** - विदुषाम् कथनम् अस्ति यत् (i).................... प्रथमः धर्मः वर्तते। इति कथनं (ii)........ धारणीयम्। अस्माभिः (iii).......... अपि अधिक सावधानतया सदाचारस्य (iv)....... विशेषरूपेण करणीया।<br>**मञ्जूषा-**<br>रक्षा, मनसि, आचारः, प्राणेभ्यः | 1/2x4=2<br><br><br><br><br><br><br><br><br>1/2x4=2 |
| **19** | **अधोलिखित-कथांशं समुचित-क्रमेण लिखत -**<br>(i) अस्ति देउलाख्यो ग्रामः।<br>(ii) तत्र राजसिंहः नाम राजपुत्रः वसति स्म।<br>(iii) एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।<br>(iv) मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।<br>(v) सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद।<br>(vi) कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः?<br>(vii) अयमेकस्तावद्विभज्य भुज्यताम्।<br>(viii) पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते। | 1/2x8=4 |